Shri Raghunath Temple MSS. Library,
JAMMU

No. ४७०१

Title उपनयन पद्धतिः वाजसनेयिनाम्

Author रामदत्तः

Extent १६ पत्राणि Age ×

Subject सूत्रपद्धतिः

उपनयनपद्धतिः

४७०१

4701

F = 16

ॐ श्रीगणेशाय नमः अथ ऊशाडिकाप्रारंभः ॐ यस्तु शायतत्पुरुषाय तत्कर्मफलप्रदं नामानि यत्र
पुरुषाय तत्कर्मफलाप्तये अथ ऋष्यादिविनियोगपूर्वकवेदोक्तमंत्रैः कर्मफलजननार्था
यजुःशाडिकामाह तत्र मंत्राणामृष्यादिविनियोगः उक्तो वाजसनेयवर्त्ततरभेदमाध्यंदिनी
ययजुर्वेदसंहितायामुपयोगित्वेन परिभाषायां अविदित्वा ऋषिं छंदो दैवतं योगमेव च
योऽध्यापयेज्जपेद्वापि पापीयान् जायते तु सः इत्यादिस्मृतेश्च एतान्‌ऋषिदैवतछंदांसि ज्ञात्वा
योऽधीते ध्यायते जपहोमं जयते याजयनाति उक्तेन तस्य मंत्राः निर्वीर्या यातयामाश्च किंचित्क
राभवंति एवंविधैर्मंत्रैः कृतं सर्वं निष्कलं भवतीत्यर्थः नरकपातस्य कृतभावोपत्व वधि
रत्वयापिष्टत्वादिभावस्य कर्तरि निष्टं फलं भवति यदि तु ऋष्यादि ज्ञात्वा दियतादि उक्तेः
तस्या मंत्रा वीर्यवंतो भवंति यस्तु मंत्राणामर्थं ऋष्यादिकं च विदित्वा तस्य मंत्राः वीर्यव
न्तो भवंति एवंविधैर्मंत्रैः कृतं कर्मावश्यफलजनने समर्थं भवति अतः कर्मणः प्रारंभे
अवश्यं मंत्राणां ऋषिदैवतछंदांसि तेयानि कर्मारंभे मंत्राणां देवता वेदितव्याः यत्तस्य मन्त्र
स्य देवता तेनोह्यविर्देयम् इत्यादिवचनादि वचनादिवचनादिति तथाचाह यास्कोक्तम्
आर्षं छंदश्च दैवत्यं विनियोगं तथैव च वेदितव्यं प्रयत्नेन ब्राह्मणेन विपश्चिता अविदित्वा
तु यः कुर्यात् याजनाध्ययने जपं होमम् अंतर्जलादीनि तस्य चाल्पफलं भवेदिति किं चात्र क
र्मणा २ दौ विनियोगादिकं चिंतयेत् विनियोगो नाम संबंध मंत्राणां गिभावरूपं एकस्यैव
मंत्रस्य विविधत्वात् देवकेषु सजातीयेषु च कर्मस्वज्ञाततोयस्मिन्कर्मणि यदंगभावे
१

भजेतेन दातास्मिन्कर्मणि विनियोगो स्तेयः अन्तो जपे साधे जपे विनियोगः इत्यादिश्रुतेयमि
ति एवमहार्णवे श्रीरुद्रविधिस्थले स्पष्टं तदेगत्वेसिद्धं इत्यादिवचनेनऋष्यादि विनियोग
पूर्वकवेदोक्तमंत्रैः ॐ शांति कामावश्यमेवकर्त्तुमर्हसि तद्यथा तत्रादौ ॐ शांतिकाप्रमा
णमाह तत्र प्रकारः पंचकुंडेषु चत्वारः शस्यन्ते बुधैः विवाहादौ चमांगल्ये चत्र्यहेकोणः
शुभः प्रदः इति अथ वेदिवेदिकायां हस्तमात्रपरिमित चतुरस्रां भूमिम् तथा च वाक्यं त
थैक हस्ति पाषाणवाल्मीकांगारवर्जिता तस्यां स्थंडिलकर्त्तव्यं चतुरस्रं करावदिः ॐ यद्दे
वा इति मंत्रस्य अग्निर्देवता अनुष्टुप्छंदः प्रकृतिऋषिः ॐ शामसमूहे विनियोगः यद्देवा
ॐ यद्देवा देवहेडनं देवासश्चकृमा वयम् अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः
इति ॐ शोः सम्मूह्य तावत् शान्तेशान्यां परित्यज्य उत्कंच हस्तलाघुदे पूर्वतः प्राक्समारपक्र
मेणोत्तरदक्षिणे उदीच्यां च समूह्य ईशान्यां परित्यजेत् इति मानस्तोकइ मंत्रस्य कौत्स
ऋषिः कुत्स रुद्रो देवता जगतीछंदः गोमयोदकेनोपलेपने विनियोगः ॐ मानस्तोके त
नये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः मा नो वीरान्रुद्र भामितो वधीर्हविष्म
न्तः सदमित्त्वा हवामहे इति गोमयोदकेनोपलिप्य सदा हस्तमात्रं स्थंडिलम् गोमूत्रं गोमयं क्षीरं
दधि सर्पि कुशोदकं एकमेकं यावनीयं मांगल्ये सर्वकर्मणि स्रुवेन स्रुवेण वा प्रागग्रं प्रादे
शमात्रमुत्तरोत्तरक्रमेण त्रिरुल्लिख्य तत्र मंत्रः ॐ वृत्रेष्विति मंत्रस्य शंयुर्बार्हस्पत्य ऋषिः इन्द्रो दे
वता बृहतीछंदः त्रिरुल्लेखने विनियोगः ॐ त्वा वृत्रेषु इन्द्र सत्पतिं नरस्त्वां काष्ठासु अर्वतः

मत्वन्नाग्निर्ब्रह्मरूल यूस्मयामहस्रवानाः अद्भिर्भसामास्तु ॐ रयमिदमंकिरसंन्नोवाजन्त
जिगेषुषे इति त्रिरुल्लिख्य तथाचोक्तं हारीतेन स्वमत्स्यस्य पाताला त्रिरुल्लिख्याल्लेखनात्
वैश्वानरः स्थितो यत्र होमेस्तत्र समागत इति ततः उल्लेखनक्रमेण ब्रह्मजज्ञानमिति मन्त्रस्य
परमेष्ठी ऋषिः पुरुषो देवता दैवी जगती छन्दः उल्लेखने विनियोगः ॐ ब्रह्मजज्ञानं
छान्तेषत ते योऽर्चयान देव सवितः परमस्याम् छन्दा ॐ शानेनयाशीर्यस्मा छिपञ्च
द्व ध यहि समस्तमतो मामौक इत्यः रचाहमेवर्नः अंगुष्ठाङ्गुष्ठिदा प्राक्शः नामिकायत
यायिनी ह्राभ्यां ततः देवस्य त्वेति जलेनाभ्युक्ष देवस्य त्वेति परमेष्ठी ऋषिः सविता देवता
प्राजापत्या बृहती छन्दः जलाभ्युक्षणे विनियोगः ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां
पूष्णो हस्ताभ्याम् इति मन्त्रेण जलेनाभ्युक्ष्य त्रिर्विवाजलेनाभ्युक्षणं कृतमिति ततस्तस्मीका
स्युपास्यवह्निमन्यद्द्वाव मयसमायाय तथा च युग रूपपात्राण्याहव्यासः हुतं युगेरव
णीपात्रेणैतानापारेष्यमेव चक्षापरेण पात्रं च कलौ कांस्यप्रशस्यत इति ॐ अग्निर्मूर्द्धेति म
न्त्रस्य विरूपाक्ष ऋषिः दग्निर्देवता गायत्री छन्दः अग्न्यावाहने विनियोगः ॐ अग्निर्मूर्द्धा दिवः
ककुत्पतिः पृथिव्या अयम् अपां रेतां सि जिन्वति इत्यग्न्यावाहनम् अग्निं दूतम्
तोदधे हव्यवाहमुपब्रुवे देवाः ॐ ऽ आसादयादिह अग्न आयाहि वीतये गृणानो हव्यदात
ये नि होता सत्सि बर्हिषि इत्यग्न्यावाहनं ॐ समिधाग्निमिति मन्त्रस्य विरूपाक्ष ऋषि २.
ही गायत्री छन्दो अग्निर्देवता अग्निप्रज्वालने विनियोगः ॐ समिधाग्निं दुवस्यत घृतैर्बोधयत

नातिष्ठेम् यास्मिन्कर्मण्यग्निहोतन ऽस्मिन्नेनाग्निनेयाययं धादिभिः संपूज्य ततः अयंतेयोनि
रिति मंत्रस्य भरतौ देववातसंज्ञौ ऋषी अग्निर्देवता अनुष्टुप्छंदः समिदादाने विनियोगः
अयंतेयोनिर्ऋत्वियो यतो जातो अरोचथाः तं जानन्नग्न आरोहाथानो वर्द्धया रयिम् इ
ति मंत्रेण समिधादानम् ततः वरणसंभृतमादाय ॐ भूर्भुवः स्वः कर्त्तव्यास्मिन्कक
र्मनिमित्तकहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म कर्त्तुममुकगोत्रममुकशर्माण
मेभिः पुष्पचंदनतांबूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे वृतोस्मीति प्रतिवचनं ॐ यथाविहि
तं कर्म कुर्वीति यजमानो वदेत् करवाणीति ब्रह्मा वदेत् ततोऽग्नेर्दक्षिणतः ॐ हिरण्यग
र्भ इति मंत्रस्य हिरण्यगर्भ ऋषिस्त्रिष्टुप्छंदः ब्रह्मा देवता आसनदाने विनियोगः ॐ हिरण्य
गर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् स दाधार पृथिवीं द्यामुतेमां कस्मै दे
वाय हविषा विधेम इति मंत्रेण ब्रह्मासनं तदुपरि प्रागग्रान्कुशानास्तीर्य ब्रह्माणमग्नी सन्नि
धावासनांतरे ॐ आवाहनं ॐ आवाहयाम्यहं देवं ब्रह्माणं कमलोद्भवं कमंडलुधरं हंस
ऊर्ध्वकेशं चतुर्मुखं वेदशास्त्रप्रवक्तारमागमोक्तविधानतः यजमानस्य यज्ञस्य ब्रह्मत्वे वरद
को भव इत्यावाहनं पूजनं च ॐ ब्रह्मयज्ञानमिति मंत्रस्य प्रजापतिरृषिरादित्यो देवता
त्रिष्टुप्छंदः ब्रह्मोपवेशने विनियोगः ॐ ब्रह्मयज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन
आवः स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः इ इति मंत्रेणाग्नेर्दक्षि
णतः क्रमेणानीय प्रकल्पितासने उपवेशयेत् ततः ध्यानं ॐ ब्रह्माणं रक्तवर्णाभं पीतवस्त्र

म

लंकृतं चतुर्भुजं चतुर्वक्त्रं सस्रुवस्रुविहस्तकमिति ध्यात्वा ॐ ब्रह्माणमिति मंत्रस्य नारायणऋषिर्विद्रोमरु
त्वान् देवता त्रिष्टुप् छंदः नमस्कारे विनियोगः ॐ ब्रह्माणमिमंतय शाङ्क्षनासः प्रभाऽइति प्र
म्रतेनो मेऽ अद्भिः त्वा शासने अति हृयन्मुकेन मारीवृहतनसानोऽ अच्छ इति ब्रह्मणे नमस्कारः
प्रणीताग्रहणम् आपोहिष्ठेत्यादिमंत्रस्य सिंधुद्वीपऋषिः आपोदेवता गायत्री छंदः प्रणी
तापूरणी विनियोगः आपोहिष्ठामयोभुवस्तानऽऊर्जे दधातन महेरणाय चक्षसे यो वः शि
वतमो रसः तस्य भाजयतेह नः उशतीरिव मातरः तस्मा ऽअरं गमाम वो यस्य क्षयाय जिन्व
थ आपो जनयथा च नः इति मंत्रेण प्रणीतापात्रं पुरितां कृत्वा वारिणा परिपूर्य उत्तरे कुशैराच्छा
3
द्य ॐ कयानइति मंत्रस्य वामदेवऋषिरिंद्रो देवता गायत्री छंदः ब्रह्मणो मुखमवलो
कने विनियोगः ॐ कया नश्चित्रऽआभुवदूती सदावृधः सखा कया शचिष्ठया वृता ।१५
इति मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात् ततः परिस्तरणं बर्हिषश्चतुर्थभा
गमादाय ॐ अग्निमीडइति मंत्रस्य ब्रह्माऋषिर्गायत्री छंदोऽग्निर्देवता आग्नेयादीशानां
तकरणे विनियोगः अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं होतारं रत्नधातमम् ।१६
इति मंत्रेण आग्नेयादीशानांते इषेत्वा इति मंत्रस्य विवस्वान् ऋषिः प्रजापतिर्देवता दैव्यु
ष्टुप् छंदः ब्रह्मणोऽग्निपर्यंतकरणे विनियोगः ॐ इषे त्वोर्जे त्वा वायवस्थ देवो वः सविता
प्रार्पयतु श्रेष्ठतमाय कर्मणऽ आप्यायध्वमघ्न्याऽ इन्द्राय भागं प्रजावतीरनमीवाऽ अय २
क्ष्मा मा वस्तेनऽ ईशत माघशंसो ध्रुवाऽ अस्मिन्गोपतौ स्यात बह्वीर्यजमानस्य पशू

आहि १७ इतिमंत्रेणाब्रह्मणोग्निपर्यंतं ॐ अग्न आयाहीतिमंत्रस्य गर्भऋषिरग्निर्देवता गाय
त्रीछंदः नैऋतान्द्वायव्यांतकर्मणि विनियोगः ॐ अग्न आयाहि वीतये गृणानो हव्यदातये नि
होतासत्सि बर्हिषि १८ इतिमंत्रेण वायव्यांतं शन्नोदेवीतिमंत्रस्य दध्यङ्गाथर्वण ऋषिः आपो
देवता गायत्रीछंदः अग्नितः प्रणीतापर्यंतकर्मणि विनियोगः ॐ शन्नोदेवीरभिष्टय आपो भवंतु
पीतये शंयोरभिस्रवंतु नः १९ इतिमंत्रेणाग्नितः पश्चिमदिशि पवित्रछेदनार्थं कुशत्रयं पवि
त्रकरणार्थं साग्रमनंतरगर्भकुशपत्रद्वयं प्रोक्षणीपात्रं आज्यस्थाली संमार्जनार्थं कुशत्रयं
उपयमनार्थं वेणीरूपकुशत्रयं समिधस्तिस्रः स्रुवः आज्यं षट्पंचाशदुत्तरवरयजमानमु
ष्टिशतद्वयावच्छिन्नमानं तंडुलपूर्णपात्रं पवित्रछेदन कुशानां पूर्वपूर्वदिशि क्रमेणासाद
नीयं ततः पवित्रस्य इत्यस्य यज्ञः परमेष्ठी ऋषिः पवित्रदेवता जगतीछंदः पवित्र
छेदने विनियोगः पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सू
र्यस्य रश्मिभिः इतिमंत्रेण पवित्रछेदन कुशैः पवित्रे छित्वा सपवित्र पवित्रकरेण प्रणी
तोदकं त्रिः प्रोक्षणीपात्रे निधाय अनामिकांगुष्ठाभ्यां द्वाभ्यां द्वाभ्यामुत्तराग्रे पवित्रे गृहीत्वा
त्रिरुत्पवनम् प्रोक्षणीपात्रस्य सव्यहस्तकरणं अनामिकांगुष्ठाभ्यां पवित्रे गृहीत्वा त्रिरुद्दिंगनं
प्रणीतोदकेन प्रोक्षणी प्रोक्षणं ततोग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निरुध्यात् आज्यस्थाल्यामा
ज्यनिर्वापः ततः इषेत्वा इतिमंत्रस्य परमेष्ठी ऋषिः प्रजापतिर्देवता दैव्यनुष्टुप्छंदः आज्याधिश्र
यणे विनियोगः ॐ इषे त्वोर्जे त्वा वायवस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्या

यदुमस्माः शुद्रमायाम्प्रजावती राणीवान्अश्वयत्मावो स्तेनः ईशत माघशंसो ध्रुवा अस्मिन्गोपतौ स्यात ब
ह्वीर्यजमानस्य पशून्पाहि इति मंत्रेणाधिश्रयणं ततो ज्वलत्तृणादिना हविर्वेष्टयित्वा प्रदक्षिणक्रमे
ण पर्यग्निकरणं ततः त्रातारमिति मंत्रस्य गर्ग ऋषिः त्रिष्टुप्छंदः इन्द्रो देवता स्रुवप्रतपने विनियोगः
ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवे सुहवꣳ शूरमिन्द्रम् ह्वयामि शक्रम्पुरुहूतमिन्द्रꣳ
स्वस्ति नो मघवा धात्विन्द्रः २२ इति स्रुवप्रतपनं कृत्वा संमार्जनकुशानामग्रैः अन्तरतो मूलैर्बाह्यतः
ॐ अनिशितेति मंत्रस्य परमेष्ठी ऋषिः स्रुवो देवता प्राजापत्या बृहती छंदः स्रुवमार्जने विनियो
गः ॐ अनिशितोसि सपत्नक्षिद्वाजिनं त्वा वाजेध्यायै सम्मार्ज्मि २३ इति मंत्रेण स्रुवमार्जनं
प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य ततो मंत्रः प्रत्युष्टं निष्टप्तं च परमेष्ठी ऋषिः रक्षो देवता सा
म गायत्री छंदः स्रुवप्रतपने विनियोगः ॐ प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयो निष्टप्तꣳ रक्षो
निष्टप्ता अरातयः उर्वन्तरिक्षमन्वेमि इति मंत्रेण पुनः स्रुवं प्रतप्य स्रुवं दक्षिणतो निदध्यात्
ततः आज्यसंस्कारः प्रदक्षिणं कारयित्वावतार्य आज्यं प्रोक्षणीवत्पवनेन उत्पूय प्रजापतिं मन
सा ध्यात्वा उपयमनकुशान्वामहस्तेनादाय तूष्णीमग्नौ घृताक्ताः समिधस्तिस्रः निक्षिपेत् तत
उपविश्य सपवित्रं प्रोक्षणोदकं मंत्रः ॐ तदेवाग्निरिति मंत्रस्य स्वयंभूर्ऋषिः अनुष्टुप्छंदः आत्मा दे
वता प्रोक्षणोदकग्रहणे विनियोगः ॐ तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः तदेव शुक्रं तद्ब्रह्म ५
ता आपः स प्रजापतिः इति मंत्रेण प्रोक्षणोदकं गृहीत्वा सपवित्रकरेण ॐ भूरसीति मंत्रस्य
परमेष्ठी ऋषिः भूर्देवता प्राजापत्या पंक्तिः छंदः अग्निपर्युक्षणे विनियोगः ॐ भूरसि भूर्बभू

र्व्वपूर्व्वं तन्पूर्व्वं तन्योस्मान्पूर्व्वंतितमन्पूर्व्वयं पूर्व्वीमः देवतानामसि वह्नितमᳪ सस्नितमस्पपितमन्न
हुतमन्देवहूतमम् ॥१६॥ इतिमंत्रेणाग्निपश्चतः देवस्यत्वेतिमंत्रस्य परमेष्ठीऋषिः सविता देवता
प्राजापत्या बृहती छंदः प्रणीतापात्रे पवित्रविनियोगः ॐ देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्या
पूष्णो हस्ताभ्याम् ॥१७॥ इतिमंत्रेण प्रणीतापात्रे पवित्रेतिधाय पाणिना दक्षिणजानुः कुशेन ब्रह्मणा
न्वारब्धः समिद्धतमेवाग्नौ स्रुवेणाज्याहुतिर्जुहोति तत्रतत्रदाहुत्यनन्तरं स्रुवावस्थित शेषस्य
प्रोक्षणीपात्रे प्रक्षेपः ॐ प्रजापतये स्वाहा इदं प्रजापतये इति मनसा ॐ इन्द्राय स्वाहा इदमग्नये
इत्याघारौ ॐ अग्नये स्वाहा इदमग्नये सोमाय स्वाहा इदं सोमाय इत्याज्यभागौ ॐ भूः स्वाहा
इदं भूः ॐ भुवः स्वाहा इदं भुवः ॐ स्वः स्वाहा इदं स्वः इतिश्री अथ हवनानन्तरं स्विष्ट
कृद्धोमः ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते इत्यन्वारंभकान्तः स्विष्टकृद्धो
मः ततः संस्रवप्राशनमाचमनं च ब्रह्मणे पूर्णपात्रदक्षिणादानम् ॥ ततः ॐ सुमित्रि
यान इति मंत्रस्य प्रजापति ऋषिः त्रिष्टुप्छंदः आपो देवता प्रणीताजलेन यजमानस्य शि
रः संमार्जने विनियोगः ॐ सुमित्रिया नः आप ओषधयः सन्तु इति सपवित्रप्रणीताजलेन
शिरः संमृज्य ततः ॐ दुर्मित्रिया इति मंत्रस्य प्रजापतिऋषिरापो देवता यजुश्छंदः प्रणी
तापात्रे पश्चान्यां न्युब्जीकरणे विनियोगः ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं
द्विष्मः इत्यैशान्यां न्युब्जीकरणं ततस्तरणक्रमेण बर्हिरुत्थाप्याज्येनाभिघार्य हस्तेनैव जुहु
यात् तत्र ॐ देवा गातुविदः मनसस्पति ऋषिः प्रजापतिर्वा देवता विराट्छंदः बर्हि

ॐ ऊषाहोमेविनियोगः ॐदेवागातुविदोगातुंवित्वागातुमित मनसस्पतऽइमंदेवयज्ञꣳ स्वाहावाते
५ धाःस्वाहा इति अथपूर्णाहुतिः ॐजातवेदस इति कश्यपजातवेदसा दृष्टीमूर्द्धानमिति भार
द्वाजऋषि द्वयस्याग्निर्देवता त्रिष्टुप्छन्दः अन्तकतमित्रकतकहेमपूर्णाहुतीविनियोगः ॐ
जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः सनःपर्षदतिदुर्गाणिविश्वानावेवसिं
धुंदुरितात्यग्निः ॐमूर्द्धानन्दिवोऽअरतिम्पृथिव्या वैश्वानरमृतऽआजातमग्निम् कविसम्रा
जमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवास्वाहा इतिपूर्णाहुतिअनन्तरं घृतधारांदद्यात् मंत्र
वसोपवित्रमितिमंत्रस्य परमेष्ठी ऋषिर्वायुर्देवता देवीजगतीछन्दः पूर्णाहुतिअनन्तरं घृतधारादा
नेविनियोगः ॐवसोःपवित्रमसिशतधारंवसोःपवित्रमसिसहस्रधारं देवस्त्वासवितापु
नातुवसोपवित्रेण शतधारेणसुप्वाकामधुक्षः तिघृतधारांदद्यात् ततः त्र्यायुषंकुर्यात् ॐत्र्या
युषमितिमंत्रस्य प्रजापतिऋषिः उष्णिकछन्दो नारायणोदेवता आत्मत्र्यायुषकरणेविनियोगः
स्रुवेणभस्मानीय ॐत्र्यायुषंजमदग्नेः इतिललाटे ॐकश्यपस्यत्र्यायुषं इतिग्रीवायां ॐय
द्देवेषुत्र्यायुषं इतिदक्षिणबाहूमूले ॐतन्नोऽअस्तुत्र्यायुषम् इतिहृदि इत्यात्मपक्षे यजमान
हस्तेकपक्षे नयजमानेपि इति श्री ऊषाडिकासमाप्ताः
ॐअथोपनयनम् तत्रशुद्धसमये रविगुरुचंद्रतारादिशुद्धौ गर्भाष्टमेऽष्टमेवानुकल्पे षोडशवत्सराभ्यंत ५
रे ब्रह्मवर्चसकामस्य पंचमेषूदगयने आपूर्यमाणपक्षेनध्यायषष्ठीरिक्ताश्चतिविज्ञतिथौरवि
गुरुशुक्रान्यतमवारेषु मध्याह्नादर्वाक् मातापित्रा मातृपूर्वकमाभ्युदयिके कृते तदभावेआचा

यैर्णोवक्तृते ब्राह्मणान्मानवकं च भोजयित्वा सशिखवपनं ततो स्नानानन्तरं यथाशास्त्रमलंकृत्वा बहि
शालायां तु शाके शाशर्करादि स्मृत्यपरिस्तृत भूभौ आचार्योऽग्निस्थापनं कुर्यात् तत्र कुशैर्हस्तपरि
मितं चतुरस्रं भूमिं परिशोध्य तानि शान्त्यानि: क्षिप्य गोमयोदकेनोपलिप्य स्रुव मूलेन प्रागग्रं प्रादे
शमात्रमुत्तरोत्तरक्रमेण त्रिरुल्लिख्योल्लेखनक्रमेण नामिकाङ्गुष्ठाभ्यां मृदमुद्धृत्य जलेनाभ्युक्ष्य नवीनकां
स्यनाग्निमानीय स्वाभिमुखं निदध्यात् ततः कुमारमाचार्यः शिष्यद्वाराग्नेः पश्चाद्दक्षि
णपार्श्वे व्यवस्थापयति ततः कुमारो बद्धाञ्जलिं संबोधयति ॐ ब्रह्मचर्यमागामीति ब्रूहि
इति प्रेषानन्तरं ॐ ब्रह्मचर्यमागामिति कुमारस्त्वाह ततो ब्रह्मचर्यसानीति आचार्येणोक्ते ब्रह्मचर्य
सानीति कुमारस्त्वाह अथ माणवकमाचार्यो वासः परिधापयति तत्राचार्येण पठनीयो मन्त्रः
ॐ येनेन्द्राय बृहस्पतिर्वासः पर्यदधादमृतं तेन त्वा परिदधाम्यायुषे दीर्घायुत्वाय बलाय वर्च
से ततो माणवकस्त्विराचमनं अथ माणवकस्य वेष्टं त्रयेण प्रवरग्रन्थियुतां कृत्वा मेखला
माचार्यो बध्नाति तत्र माणवकस्य पठनीयो मन्त्रः ॐ इयं दुरुक्तमिति वामदेवऋषिर्मेखलादे
वता त्रिष्टुप्छन्दो मेखलाबन्धने विनियोगः ॐ इयं दुरुक्तं परिबाधमाना वर्णं पवित्रं पुनती म
आगात् प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखलेयम् ॐ युवा सुवासाः प
रिवीत आगात् स उ श्रेयान्भवति जायमानः तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयं
तः इति वासः ततः आचार्यो यज्ञोपवीतसहितं भाण्डाष्टकत्रयं ब्राह्मणेभ्यो दत्त्वा ॐ अद्यक
र्तव्योपवीतपरिधानस्यागतासिद्ध्यर्थं इदं भाण्डाष्टकत्रयं यथेत्यादि ततो यज्ञोपवीतं परिदध्या

तिमाणवकः यज्ञोपवीतमिति परमेष्ठीऋषिस्त्रिष्टुप्छन्दो लिंगोक्ता देवता यज्ञोपवीतपरिधाने विनि
उप. योगः ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञो
६ पवीतं बलमस्तु तेजः इति मंत्रेण ततः पूर्णामजिनं तूष्णीं परिधत्ते ततो माणवकेशपरिमितप
लाशदंडमाचार्यो तस्मै प्रयच्छति तं च ॐ यो मे दण्डः परापतद्वैहायसोऽधिभूम्यां तमहं पुनराददे
आयुषे ब्रह्मणे ब्रह्मवर्चसाय इति मंत्रेण माणवको गृह्णाति तत आचार्यो वामिणा स्वयंजलिं पूरयि
त्वा तेनैवांजलिस्थजलेन कुमारस्यांजलिं पूरयति ॐ आपो हि ष्ठेत्यादि तिसृभिर्मंत्रैः ॐ आपो
हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन महे रणाय चक्षसे यो वः शिवतमो रसस्तस्य भाजयतेह नः
उशतीरिव मातरः ॐ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ आपो जनयथा च नः इति ऋग्भिः
स्त्रिः पूरयति ततः सूर्यमुदीक्षस्वेत्याचार्यप्रेषानन्तरं ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्ये
म शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतं प्रब्रवाम शरदः शतं अदीनाः स्याम शरदः
शतं भूयश्च शरदः शतात् इत्यनेन अथ कुमारस्य दक्षिणांसमहृदयं दक्षिणहस्तेन स्पृश
त्याचार्यः ॐ मम व्रते इति प्रजापतिऋषिस्त्रिष्टुप्छन्दो बृहस्पतिर्देवता हृदयालंभने विनियोगः
ॐ मम व्रते ते हृदयं दधामि मम चित्तमनुचित्तं ते अस्तु मम वाचमेकमना जुषस्व बृहस्पतिष्ट्वा
नियुनक्तु मह्यं इति मंत्रेण अथ कुमारस्य दक्षिणहस्तं गृहीत्वा तं पृच्छति को नामासि श्री अमुक
शर्माहं भो इति कुमार आह ॐ कस्य ब्रह्मचार्यसीत्याचार्यः ॐ भवत इति कुमारः पुनराचार्यो ६
भाषते इति कुमारः ते ॐ इन्द्रस्य ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यः श्री अमुकशर्मन्निति अथव

दांतर्तिं माणवकं पूर्वादिदिक्षु प्रदक्षिणमुपस्थानं कारयति तत्राचार्यस्य मंत्रपाठः ओं प्रजापतये त्वा परिद
धामि इति प्राच्यां ओं देवाय त्वा सवित्रे परिदधामि इति दक्षिणस्यां ओं अद्भ्यस्त्वौषधीभ्यः परिदधामि इ
ति प्रतीच्यां ओं द्यावापृथिवीभ्यां त्वा परिदधामि इत्युदीच्यां ओं विश्वेभ्यस्त्वा देवेभ्यः परिदधामि इत्यु
पः सर्वेभ्यस्त्वा भूतेभ्यः परिदधाम्युपरिष्टात् इत्यूर्ध्वं ततोऽग्निं प्रदक्षिणीकृत्याचार्यदक्षिणदिशि उप
विशति माणवकः ततः पुष्पचंदनतांबूलवासांस्यादाय ततः ओं अद्य कर्तव्योपनयनहोमकर्म
णि कृताकृतावेक्षणरूपब्रह्मकर्मकर्तृ ममकगोत्र ममक शर्माणं ब्राह्मणमेभिः पुष्पचंदन
तांबूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे इति ब्रह्माणं वृणुयात् ओं वृतोऽस्मीति प्रतिवचनं ओं यथा
विहितं कर्म कुरु यथाज्ञानं करवाणीति प्रतिवचनानंतरं अग्नेर्दक्षिणतः शुद्धमासनं दत्वा तद
परि प्रागग्रान्कुशानास्तीर्याग्निं प्रदक्षिणीकारयित्वास्मिन्कर्मणि त्वं मे ब्रह्मा भव त्वाभिध्याय भवामीति
तेनोक्ते तदुपरि ब्रह्माणमुदङ्मुखमुपवेश्य प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य कुशैराच्छा
द्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात् ततः परिस्तरणं एकशाखो द्विशाखस्त्व
तृणं वल्वजोच्यते बुधैः त्रिशाखस्तु भवेद्दर्भस्त्वन्तःशाखः कुशास्ततः पंचशाखः यथाप्रोक्ता षट्शाखः
शवरस्ततः सप्तशाखस्तु जनया ऽष्टशाखस्तरोहिता अत ऊर्ध्वं वेदविद्भिर्बर्हिस्तु परिकीर्तितः ब
र्हिषश्चतुर्थभागमादायाग्नेयादीशानांतं अपरेण चतुर्थभागेन ब्रह्मणोऽग्निपर्यंतं अपरेणानेन त्वा ह्या
यव्यांतं अवशिष्टेनाग्नितः प्रणीतापर्यंतं ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं साग्रमनंतर्ग
र्भं कुशापत्रद्वयं प्रोक्षणीपात्रमाज्यस्थाली संमार्जनकुशाः उपयमनार्थं वेणीरूपकुशात्रयं सम्

उप· सिधलितः स्रुवः आज्यं षट्पंचाशङ्गुलाचार्यमदक्षिणान्हयावच्छिन्नामनङ्गुलपूर्णायात्रं पविच्छेदनकुशोः प
२ वित्रेच्छित्वा सपवित्रकरेण प्रणीतोदकेन त्रिः प्रोक्षणीपात्रे निधायानामिकाङ्गुष्ठाभ्यां प्रोक्षणीपात्रे वांके र म॑
णादायाग्रामिकाङ्गुष्ठाभ्यां पवित्रे गृहीत्वा त्रिरुद्दिंग नं गृहीत्वा पवित्राभ्यां त्रिरुत्पूय प्रणीतोदकेन प्रो
क्षणीं त्रिरभिषिच्य प्रोक्षणीजलेनाज्यादिनवस्तु संघनं कृत्वाग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्या
त् आज्यस्थाल्यामाज्यं निरूप्याधिश्रयणं ततो ज्वलत्तृणमादाय ज्यस्यायरिप्रदक्षिणं ·· ब्रालयित्वा
वह्नौ तत्प्रक्षेपः ततस्त्रिः स्रुवं प्रतप्य संमार्जनकुशानामग्रैरंतरतो मूलैर्बाह्यतः स्रुवं संमृज्य प्रणी
7 तोदकेनाभ्युक्ष्य पुनस्त्रिः प्रतप्य दक्षिणतो दध्यात् तत आज्यमग्नेरवतार्य त्रिःप्रोक्षणीपवङ्ग्नपूर्वी
वेदपसत्यद्रव्यं तन्निरस्य तेनेहत्वा पुनः प्रोक्षणीमुत्पूय ततउत्थायउपयमनकुशानामहस्ते
नादाय प्रजापतिं मनसाध्यात्वा तूष्णीमग्नौ घृताक्ताः तिस्रः समिधः प्रक्षिपेत् उपविश्यसपवि
त्रप्रोक्षण्युदकेन प्रदक्षिणमग्निं पर्युक्ष्य प्रणीतापात्रे पवित्रे निधाय पातितदक्षिणजानुर्नब्रह्मणा
न्वारब्धः समिद्धतमेऽवाग्नौ स्रुवेणाज्याहुतीर्जुहोति तत्र ततदाहुत्यनन्तरं स्रुवावस्थितहुतशेषस्य प्रो
क्षणीपात्रे प्रक्षेपः ॐ प्रजापतये स्वाहा इदं प्रजापतये इति मनसा ॐ इन्द्राय स्वाहा इदमिन्द्राय
इत्याघारौ ॐ अग्नये स्वाहा इदमग्नये ॐ सोमाय स्वाहा इदं सोमाय इत्याज्यभागौ ॐ भूः स्वाहा
इदं भूः ॐ भुवः स्वाहा इदं भुवः ॐ स्वः स्वाहा इदं स्वः एता महाव्याहृतयः ॐ त्वन्नो अग्ने वरु
णस्य विद्वान्देवस्य हेडोऽवयासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्र
मुमुग्ध्यस्मत्स्वाहा इदमग्नीवरुणाभ्यां ॐ स त्वन्नो अग्ने वमो भवती ति दिष्टो अस्या उषसो व्यु

ष्ठोअवयक्ष्वानोवरुणं रराणोवीहिमृडीकं सुहवोनएधिस्वाहा इदमग्नीवरुणाभ्यां ओं अयाश्चाग्नेस्यन
भिशस्तिपाश्च सत्यमित्वमयाअसि अयानोयज्ञंवहास्ययानोधेहिभेषजं स्वाहा इदमग्नये ओं येतेशतं
वरुणयेसहस्रं यज्ञियाःपाशावितता महान्तः तेभिर्नोअद्यसवितोतविष्णुर्विश्वेमुञ्चन्तुमरुतः स्वर्काः स्वाहा
इदंवरुणाय सवित्रेविष्णवे विश्वेभ्योदेवेभ्योमरुद्भ्यः स्वर्केभ्यः ओं उदुत्तमं वरुणपाशमस्मदवाधमं वि
मध्यमं श्रथाय अथावयमादित्यव्रते तवानागसोअदितयेस्याम स्वाहा इदं वरुणायादित्यायादित
येनमम इतिसर्वप्रायश्चित्तसंज्ञकः ओं प्रजापतयेस्वाहा इदंप्रजापतये नमम इतिमनसा इतिप्रा
जापत्यं ओं अग्नयेस्विष्टकृतेस्वाहा इदमग्नयेस्विष्टकृते नमम ततः संस्रवप्राशनं ततआचम्य
ओं अद्येत्यस्मिन्नुपनयनहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रंप्रजाप
तिदेवतं अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इतिदक्षिणां दद्यात् ओं स्वस्तीति
प्रतिवचनं ततोब्रह्मग्रन्थिविमोकः ओं सुमित्रियानआपओषधयः सन्त्विति पवित्राभ्यां प्रणीताजलेन
शिरः संमृज्य ओं दुर्मित्रियास्तस्मैसन्तु योस्मान्द्वेष्टि यंचवयंद्विष्मः इत्यैशान्यां प्रणीतान्युब्जीकरणं
ततआस्तरणाद्बर्हिरुत्थाप्यघृतेनाभिघार्य हस्तेनैवहोमः ओं देवागातुविदोगातुंवित्वागातुमितमनसस्
स्पत इमंदेवयज्ञं स्वाहावातेधाः स्वाहा इतिमन्त्रेणजुहुयात् ततआचार्यः कुमारस्यानुशासनंकरो
ति ओं ब्रह्मचार्यसीत्याचार्यः असानीति ब्रह्मचारी अपोशानेत्याचार्यः अश्नानीतिकुमारः कर्मकु
र्वित्याचार्यः करवाणीतिमाणवकः मादिवासुषुप्थ इत्याचार्यः बाढानीतिमाणवकः समिधमाधेही
त्याचार्यः आददानीति माणवकः अथाग्नेरुत्तरतः प्रत्यङ्मुखायोपविष्टायाचार्यश्चरणोपसंग्रह-

उप. णपूर्वकमुपसन्नायाचार्यस्समन्वीक्षमाणायाचार्यः स्वयमपि समन्वितायास्मै द्विवारिनशंखेनत्र्यी
८ दिशोर्ध्वः रक्षोघ्नाकीसावित्री मन्वाहकथमन्वाहः पादंपादमर्द्धर्चः ततस्त्वर्द्धर्चं ततस्सर्वं तत्तीयेन
वारेणसहमेलयित्वाऽऽवर्तयन् तत्रप्रथमावृत्तौक्रमः ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यंभर्गोदेवस्य
धीमहिधियोयोनः प्रचोदयात् ॐ प्रुतर्वीरत्वयमानवकस्य दक्षिणकर्णेअत्रच पदपाठोविशेषः
अथमाणवकआचार्य दक्षिणदिशिअग्निपश्चिमोपविष्टोघृताक्तस्रुक्छिद्रेनरैयनेनजुहुया
त् तत्र ॐ अग्नयेसुश्रवसेस्वः सुश्रवासंमाकुरु ॐ यथात्वमग्नेसुश्रवः सुश्रवाअग्नेअसि ॐ एवंमा
ꣳ सुश्रवः सुश्रवसंकुरु ॐ यथात्वमग्नेदेवानांयज्ञस्यनिधिपाअसि ॐ एवंमहंमनुष्याणांदेवस्य
निधिपोभूयासं ततः प्रदक्षिणमग्निंवारिणापर्युक्ष्य उत्थायप्रादेशमितां घृताक्तपलाशसमिधमहा
र्षिहहते जातवेदसेयथात्वमग्ने समिधासमिध्यसएवमहमायुषामेधया वर्चसाप्रजयापशुभिर्ब्रह्मव
र्चसे तमसिंधेजीवपुत्रोममाचार्योमेधाव्यह मसान्यनिराकरिष्णुर्यशस्वीतेजस्वीब्रह्मवर्चस्यन्नादो
भूयासंस्वाहा इतिमंत्रेणजुहुयात् ततोनेनैवक्रमेण द्वितीयांतृतीयामपिजुहुयात् उपविश्यघृताक्त
स्रुक्छिद्रेनैव यनेनपंचाहुतीर्जुहुयात् ॐ अग्नेसुश्रवः सुश्रवसंमाकुरु यथात्वमग्नेसुश्रवः
सुश्रवाअसि एवमा सुश्रवः सौश्रवसंमाकुरु ॐ यथात्वमग्नेदेवानां यज्ञस्यनिधिपाअसि ॐ एव
वमहंमनुष्याणांवेदस्यनिधिपोभूयासं ततः प्रदक्षिणमग्निंउदकेनपर्युक्ष्यतस्मिन्पाणीप्रतप्यमुखंप्रति
मंत्रोनेवमृष्टवति ॐ तनूपाअग्नेऽसितन्वंमेपाहि ॐ आयुर्दाअग्नेस्यायुर्मेदेहि ॐ वर्चोदाअग्नेऽसिवर्चोमेदेहि ८
ॐ अग्नेयन्मेतन्वाऊनंतन्मआपृण ॐ मेधांमेदेवः सविताआदधातु ॐ मेधांमेदेवीसरस्वतीआदधातु ॐ

मेधामेऽश्विनौ देवावाधत्तां पुष्करस्रजौ ॥ ततः सर्वगात्रादिषु दक्षिणपाणिनास्पर्शः तत्र प्रत्येकं मन्त्रः ॐ
अङ्गानि च मऽआप्यायन्तां इति सर्वगा लंभने ॐ वाक् च मऽआप्यायतां इति मुखालंभने ॐ प्राणश्च मऽआप्या
यतां इति नासिकयोः ॐ चक्षुश्च मऽआप्यायतां इति चक्षुषोः ॐ श्रोत्रं च मऽआप्यायतां इति कर्णयोः ॐ
यशोबलं च मऽआप्यायतामिति पादमात्रे ततो दक्षिणकरानामिकाग्रगृहीतभस्मना ललाटे ग्रीवा
यां दक्षिणबाहुमूले हृदि च त्र्यायुषं कुर्यात् तत्र यथासंख्येन मन्त्रचतुष्टयं ॐ त्र्यायुषं जमदग्नेः ॐ क
श्यपस्य त्र्यायुषं यद्देवेषु त्र्यायुषं ॐ तन्नोऽस्तु त्र्यायुषं ततो व्यस्तपाणिभ्यां ॐ पृथिवीं स्पृशन् ॐ वै
श्वानराभिवादनं कुर्यात् ॐ तत्र प्रकारः ॐ अमुकगोत्रोऽहममुकप्रवरोऽहं अमुकशर्माहं त्वं वैश्वा
नरत्वामभिवादये ततोऽनेनैव क्रमेण वरुणं सवीप्यवरुणमभिवादये आचार्यं तथैवाभिवादये त
त आयुष्मान्भव सोम्य इत्याचार्यो ब्रूयात् ततो भिक्षार्थं पात्रमादाय प्रथमं मातुः सकाशात् भव
ति भिक्षां देहि इति प्रार्थनानन्तरं तद्गतो भिक्षामादाय प्रथममाचार्याय निवेदयेत् तथैव भिक्षान्
रं यावत्त्रीन् ततः आचार्येण भैक्ष्यं भुंक्ष्वेत्यनुज्ञातो भिक्षां स्वीकुर्यात् ततः फलपुष्पादिना पूर्णाहुतिस्तत्र मन्त्रः
ॐ मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निं कविं सम्राजमतिथिं जनानामासन्न
पात्रं जनयन्त देवाः स्वाहा ततः स्रुवेण भस्मानीय दक्षिणानामिकाग्रगृहीतभस्मना ॐ त्र्यायुषं
जमदग्नेः इति ललाटे ॐ कश्यपस्य त्र्यायुषमिति ग्रीवायां यद्देवेषु त्र्यायुषमिति दक्षिणबाहुमूले
तन्नोऽस्तु त्र्यायुषमिति हृदि इति त्र्यायुषं कुर्यात् कुमारपदितनोऽरत्नपस्थाने ततेइति विशे
षः अथाक्षारलवणमधुमांसादिनिवृत्तिः अकृतमलस्नानदंडकृष्णाजिनधारणं हत्वारोहण

विषभक्षितं च न नग्नस्त्रीनिरीक्षणं स्त्रीसंभोगव्यसनव्याहृति नृपा ब्रह्मचारिणो नियमाः तद्दिने ब्रह्मचा
रीवाग्यतोऽहः शेषं स्थित एव गमयेत् ततः सायं संध्याक्रमात् अस्मिन्नेवाग्नौ पूर्ववत् पर्युक्षणं परि
समूहनं च कृत्वा वाचं विसर्जयेत् परिसमूहनं तु प्रच्छन्निषेधेऽतरे यतस्याग्नेः प्रदेशः संध्याक्र
पास्य प्रतिदिनं सायं प्रातरपि ब्रह्मचारिणा कर्तव्यः अथ वेदारंभः तत्र व्रतनित्यक्रिया आचा
र्यो कुशैर्हस्तमितां भूमिं परिसमूह्य तान् कुशानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्रुवमूले
न स्फ्येन वा प्रागग्रं प्रादेशमात्रमुत्तरोत्तरक्रमेण त्रिरुल्लिख्य उल्लेखनक्रमेण नामिकांगुष्ठाभ्यां
मृदमुद्धृत्य जलेनाभ्युक्ष्य कांस्येनाग्निमानीय प्रत्यङ्मुखमग्निं समादाय पुष्पचंदनतांबूलवस्त्रा
न्यादाय ॐ अद्य कर्तव्यवेदारंभहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्र
ममुकशर्माणं ब्राह्मणमेभिः पुष्पचंदनतांबूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे इति ब्रह्माणं वृणु
यात् वृतोऽस्मीति प्रतिवचनं यथाविहितं कर्म कुरु इत्याचार्येणोक्ते ॐ करवाणीति तेनोक्ते अग्ने
र्दक्षिणतः शुद्धमासनं दत्वा तदुपरि प्रागग्रान् कुशानास्तीर्य अग्निप्रदक्षिणक्रमेण ब्राह्मयित्वा
अस्मिन्कर्मणि त्वं मे ब्रह्मा भवेत्यभिधाय भवानीति तेनोक्ते ब्रह्माणमुदङ्मुखं तत्रोपवेश्य प्रणी
तापात्रं कुरुतः कृत्वा वारिणा परिपूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोप
रि निदध्यात् ततः परिस्तरणं बर्हिषश्चतुर्थभागमादायाऽऽग्नेयादीशानान्तं ब्रह्मणोऽग्निपर्यन्तं नैर्ऋ
त्याद्वायव्यान्तं अग्नितः प्रतीतः पर्यन्तं ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं ५
पवित्रच्छेदनार्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयं प्रोक्षणीपात्रमाज्यस्थाल्यासंमार्जनकुशाः उप

यमनार्थं वेणीरूपकुशत्रयं समिधस्तिस्रः स्रुव आज्यं षट्पंचाशदुत्तराचार्यमुष्टि
शतद्वयावच्छिन्नामतंडुलपूर्णपात्रं एतानि पवित्रच्छेदनकुशानां पूर्वपूर्वदि-
शि क्रमेणासादनीयानि ततः पवित्रच्छेदनकुशैः पवित्रे छित्वा सपवित्र
करेण प्रणीतोदके त्रिः प्रोक्षणीपात्रे निधाय द्वाभ्यामनामिकांगुष्ठाभ्यामुत्त
राग्रे पवित्रे गृहीत्वा त्रिरुत्पवनं ततः प्रोक्षणीपात्रं वामहस्ते कृत्वा दक्षिणह
स्तानामिकांगुष्ठाभ्यां त्रिरुद्गिंगनं ततः प्रणीतोदकेन[illegible]सादितवस्तून्य,
प्रोक्षणीपात्रमभ्युक्ष्य प्रोक्षण्युदकेन यथासादितवस्तून्यभ्युक्ष्याग्निप्रणीतयो
र्मध्ये प्रोक्षणीपात्रं निदध्यात् तत आज्यस्थाल्यामाज्यं निरूप्याधिश्रयणं ततस्तृ
णाग्रं ज्वाल्याज्यस्याग्नेश्चोपरि भ्रमद्दक्षिणं भ्रामयित्वा वह्नौ गतस्य क्षेपः ततस्त्रिः स्रुवप्र
तपनं संमार्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः स्रुवं संमृज्य प्रणीतोदकेना
भ्युक्ष्य पुनस्त्रिः प्रतप्य दक्षिणतो निदध्यात् तत आज्यं प्रोक्षणीवदुत्पवनं अवेक्ष्य
तस्य यद्द्रव्येन निरसनं ततः प्रोक्षण्युत्पवनं तत उपयमनकुशान्वामह

स्नेनादाय उत्तिष्ठन्प्रजापतिं मनसाध्यात्वात्तूष्णीमग्नौ हुत्वाऽऽक्कास्थितः समिधः प्र
उप. क्षिपेत् ततउपविश्य सपवित्रेणास्रुवेणोदकेनप्रदक्षिणक्रमेणाग्निं पूर्ववत्पर्युक्ष्य
१८ प्रणीतापात्रेपवित्रेनिधाय ब्रह्माचारब्धः पातितदक्षिणजानुः समिद्धतमे
वाग्नौजुहुयात् ततप्रथमाहुतिः चतुष्टयेपक्षवावास्थित हुतशेषघृतस्य
प्रोक्षणीपात्रेप्रक्षेपः ॐप्रजापतयेस्वाहा इदंप्रजापतये इतिमनसा ॐइंदे
इंद्रायस्वाहा इदमिंद्रायस्वाहा इत्याघारौ ॐअग्नयेस्वाहा इदमग्नये ॐसो
मायस्वाहा इदंसोमाय इत्याज्यभागौ ततःप्राक्तौन्वारब्धकर्तृकोहोमः
10 ॐअंतरिक्षायस्वा इदमंतरिक्षायं वायवेस्वाहा इदंवायवे ब्रह्मणेस्वा
हा इदंब्रह्मणे छंदोभ्यः स्वाहा इदंछंदोभ्यः ॐ ॥ ॥ ॥

ॐ ततः सामान्याहुतयः ॐ प्रजापतये स्वाहा इदं प्रजापतये इति मनसा देवेभ्यः स्वाहा इदं
देवेभ्यः ॐ ऋषिभ्यः स्वाहा इदं ऋषिभ्यः ॐ श्रद्धायै स्वाहा इदं श्रद्धायै मेधायै स्वाहा इदं मेधायै
ॐ सदसस्पतये स्वाहा इदं सदसस्पतये ॐ अनुमतये स्वाहा इदं अनुमतये ततोन्वारब्धकर्तृको हो
मः तत्र तत्तदाहुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ॐ भूः स्वाहा
इदं भूः ॐ भुवः स्वाहा इदं भुवः ॐ स्वः स्वाहा इदं स्वः एता महाव्याहृतयः ॐ त्वन्नो अग्ने
वरुणस्य विद्वान्देवस्य हेडो अवयासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि
सि प्रमुमुग्ध्यस्मत्स्वाहा इदमग्नीवरुणाभ्यां स त्वन्नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो
व्युष्टौ अवयक्ष्व णो वरुणं रराणो वीहि मृडीकं सुहवो न एधि स्वाहा इदमग्नीव
रुणाभ्यां ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्त्वमया असि अया नो यज्ञं वहास्ययानो धे
हि भेषजं स्वाहा इदमग्नये ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः तेभिर्नो
अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो दे
वेभ्यो मरुद्भ्यः स्वर्केभ्यः ॐ उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमं श्रथाय अथा
वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा इदं वरुणाय इति प्रायश्चित्तं ॐ प्रजा
पतये स्वाहा इदं प्रजापतये इति मनसा इति प्राजापत्यं ॐ अग्नये स्विष्टकृते स्वाहा इदमग्न
ये स्विष्टकृते इति स्विष्टकृद्धोमः ततः संस्रवप्राशनं ततआचम्य अयक्षतेन तेह्वदारंभहोम
कर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतं अमुकणां

उप॰ गोत्रायामुकशर्मणे ब्राह्मणाय ब्रह्मणे दक्षिणां तुभ्यमहं संप्रददे इति दक्षिणां दद्यात् ॐ स्वस्ती
११ ति प्रतिवचनं ततो ब्रह्मग्रन्थिविमोकः ॐ सुमित्रियानआप ओषधयः सन्तु इति पवित्राभ्यां प्रणी
ताजले न शिरः संमृज्य दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः इति मंत्रेणैशान्यां प्र
णीतान्युब्जीकरणं कुर्यात् ततस्स्रवणाक्रमेण वर्हिरुत्थाप्याज्येनाभिघार्य्य न्यूटिकावद्धाहस्तेनै
व जुहुयात् ॐ देवा गातुविदो गातुं वित्त्वा गातुमित मनसस्पत इमं देव यज्ञं स्वाहा वाते धाः स्वाहा
इति मंत्रेण ततः इष्टाशाके वेदारम्भं गुरुः कारयेत् तत्रक्रमः ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भ
र्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॐ इति प्रणवान्तं पाठयित्वा पंक्तिं नमस्कारं च कारयि
त्वा ॐ समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिं आस्मिन्हव्या जुहोतन ततः समस्तिद्धायशोचिषे
इति ऊँ ड्रिकान्तरवाक्किकया वा पाठयेत् इति सप्रणवस्वस्तिवाचयित्वा अथ ब्रह्मचारी का
र्पां गच्छति उत्थाय फलपुष्पसमन्वितब्रह्मचारी दक्षिणकरस्पृष्ट स्रुवेण पूर्णाहुतिं जुहु
यात् ॐ मूर्द्धानमित्यादिना मंत्रेण स्वाहान्तेन ततउपविश्य स्रुवेण भस्मनीय दक्षिणानामि
काग्रगृहीतभस्मना ॐ त्र्यायुषं जमदग्नेः इति ललाटे कश्यपस्य त्र्यायुषमिति ग्रीवायां ॐ
यद्देवेषु त्र्यायुषमिति दक्षिणबाहुमूले ॐ तन्नो अस्तु त्र्यायुषमिति हृदि इति त्र्यायुषं कुर्या
त् अनेनैव क्रमेण ब्रह्मचारी ललाटादावपि तत्र तत्र अस्ति इति विशेषः अथ समावर्त्तनम्
तत्र शुभे दिने गृहीभूय आचार्य स्नास्यामीति कुमार आचार्यमभाषते ततआचार्यः स्ना
हीति ततो ब्रह्मचारिणि आचार्यदक्षिणदिशि उपविष्टे कृतस्नानादिराचार्यः कुशोर्ध्वस्त्रमा

ओं भूमिं पवित्रमुद्धिताङ्गुष्ठानेनान्यो पवित्रजलेनामयोदकेनाभ्युक्ष्य स्रुवमूलेनोत्तरोत्तरक्रमेण त्रिरु
लिख्योल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यां मृदमुद्धृत्य जलेनाभ्युक्ष्य कांस्यनाग्निमानीय प्रत्यङ्मुखं निदध्यात्
ततः पुष्पचंदनताम्बूलवासांस्यादाय ओं अद्यामुकस्य कर्त्तव्यसमावर्त्तनहोमकर्मणि कृताकृता
वेक्षणरूपब्रह्मकर्मकर्त्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचंदनताम्बूलवासोभि
र्ब्रह्मत्वेन त्वामहं वृणे इति ब्रह्माणं वृणुयात् ओं वृतोऽस्मीति प्रतिवचनं ओं यथाविहितकर्म
कुर्वित्यभिधाय ओं करवाणीति तेनोक्ते अग्नेर्दक्षिणतः शुद्धमासनं दत्वा तदुपरि प्रागग्रान्कु
शानास्तीर्य अस्मिन्कर्मणि त्वं मे ब्रह्मा भवेत्यभिधाय ओं भवानीति तेनोक्ते ब्रह्माणमुदङ्मुखं तत्रो
पवेशय ततः प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरु
त्तरतः कुशोपरि निदध्यात् ततः परिस्तरणं बर्हिषश्चतुर्थभागमादायाग्नेयादीशानान्तं ब्रह्मणोऽग्नि
पर्यन्तं नैर्ऋत्याद्वायव्यान्तं अग्नितः प्रणीतापर्यन्तं ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कु
शात्रयं पवित्रकरणार्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयं प्रोक्षणीपात्रं आज्यस्थाली संमार्जनकुशा
उपयमनकुशाः समिधस्तिस्रः स्रुवः आज्यम् पूर्णपात्रं पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्र
मेणासादनीयं पवित्रच्छेदनकुशैः पवित्रे छित्वा सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे
निधायाऽनामिकाङ्गुष्ठाभ्यां द्वाभ्यां पवित्रे गृहीत्वा त्रिरुत्पूय प्रोक्षणीपात्रं वामकरे निधायाऽना
मिकाङ्गुष्ठाभ्यां गृहीतपवित्राभ्यां त्रिरुद्दिङ्गनं प्रणीतोदकेन प्रोक्षणीमभ्युक्ष्य प्रोक्षणीजलेनासा
दितवस्तूनि अभिषिच्याग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् तत आज्यस्थाल्यामाज्यं निरू

प्याधिश्रयणं ततस्तेनां प्रज्वाल्याज्यस्याग्रे प्रोपरि प्रदर्णं भ्रामयित्वा वह्नौ तत्प्रादेशं श्रुवं त्रिः प्रतप्य संमा
उप. र्जनकुशानामग्रैरंततोमूलैर्वीयतः श्रुवं संमार्ज्य प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य स्वदक्षिणतो
१२ निदध्यात् ततआज्यमग्नेः प्रदक्षिणं कारयित्वा ऽवतार्य त्रिः प्रोक्षणीवदुत्पूयावेक्ष्य सत्यपद्रव्ये तन्नि
रस्य तेन कृत्वा पुनः पूर्ववत्प्रोक्षणीवत्पवनं ततउत्थायोपयमनकुशान्वामहस्ते कृत्वा प्रजाप
तिं मनसा ध्यात्वा सममन्त्रो घृताक्ताः समिधः प्रक्षिपेत् ततउपविश्य सपवित्रप्रोक्षण्युदकेन प्रद
क्षिणक्रमेणाग्निं पूर्ववत् पर्युक्ष्य प्रणीतापात्रे पवित्रे निधाय पातितदक्षिणजानुः कुशेन ब्रह्म
12 णान्वारब्धः समिद्धतमेवाग्नौ श्रुवेणाज्याहुतीर्जुहुयात् तत्र प्रथमाहुतिचतुष्टये प्रत्याहुत्यनंत
रं श्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ओं प्रजापतये स्वाहा इदं प्रजापतये इतिम
नसा ओं इंद्राय स्वाहा इदमिंद्राय इत्याघारौ ओं अग्नये स्वाहा इदमग्नये ओं सोमाय स्वाहा इदं २
सोमाय इत्याज्यभागौ ततोन्वारब्धकर्तृको होमः ओं अंतरिक्षाय स्वाहा इदमंतरिक्षाय ओं वा
यवे स्वाहा इदं वायवे ओं ब्रह्मणे स्वाहा इदं ब्रह्मणे ओं छंदोभ्यः स्वाहा इदं छंदोभ्यः ओं प्रजा
पतये स्वाहा इति मनसा ओं देवेभ्यः स्वाहा इदं देवेभ्यः ओं ऋषिभ्यः स्वाहा इदं ऋषिभ्यः ओं
श्रद्धायै स्वाहा इदं श्रद्धायै ओं मेधायै स्वाहा इदं मेधायै ओं सदसस्पतये स्वाहा इदं सदसस्पतये
ओं अनुमतये स्वाहा इदं अनुमतये ओं ततो ब्राह्मणान्वारब्धो जुहुयात् अत्राहुतदशानये ततदाहु
त्यनंतरं श्रुवावस्थितादे भूः स्वाहा ओं भुवः स्वाहा इदं भुवः ओं स्वः स्वाहा इदं स्वः एता महा
व्याहृतयः ओं त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अवयासिसीष्ठाः यजिष्ठो वह्नितमः शोशु

वानो विश्वद्वेषांꣳसि प्रमुमुग्ध्यस्मात्स्वाहा इदमग्नीवरुणाभ्यां ॐ स त्वन्नो अग्ने ऽवमो भवोती· ने
अस्या उषसो व्युष्टौ अवयक्ष्व नो वरुणꣳ रराणो वीहि मृडीकꣳ सुहवो न एधि स्वाहा इदमग्नी
वरुणाभ्यां ॐ अयाश्चाग्ने ऽस्यनभिशस्तिपाश्च सत्यमित्वमया असि अया नो यज्ञं वहास्यया नो धे
हि भेषजꣳ स्वाहा ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः तेभिर्नो अद्य सवितोत विष्णुर्वि
श्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः ॐ उ
दुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमꣳ श्रथाय अथा वयमादित्य व्रते तवानागसो अदितये स्या
म स्वाहा इदं वरुणाय ॐ प्रजापतये स्वाहा इदं प्रजापतये इति मनसा इति प्राजापत्यं ॐ अग्नये स्वि
ष्टकृते स्वाहा इदमग्नये स्विष्टकृते इति स्विष्टकृतं ततः संस्रवप्राशनं तत आचम्य ॐ अद्य कृते
तत्समावर्तनहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म प्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैव
तममुकगोत्रायामुकशर्मणे ब्राह्मणाय ब्रह्मणे दक्षिणां तुभ्यमहं संप्रददे इति दक्षिणां दद्यात् ॐ
स्वस्तीति प्रतिवचनं ततो ब्रह्मग्रन्थिविमोकः ततः पवित्राभ्यां प्रणीताजलेन ॐ सुमित्रिया न आप
ओषधयः सन्तु इति मन्त्रेण शिरः मार्जनं संमृज्य दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्म
इति मन्त्रेण ऐशान्यां प्रणीतान्युब्जीकरणं ततस्तरणक्रमेण बर्हिरानीय घृतेनाभिघार्य हस्तेनैव होमः
ॐ देवा गातुविदो गातुं वित्त्वा गातुमित मनसस्पत इमं देव यज्ञꣳ स्वाहा वाते धाः स्वाहा ततो ब्रह्मणान्वा
रब्धकर्तृकं कर्म ततोऽग्नेः पश्चिमायां पविष्टो ब्रह्मचारी परिसमूहनं कुर्यात् तत्र कृताञ्जलिः प्रक्षालिनि
वेणोः पनेन पंचाङ्गुलिर्हस्तेनैव जुहुयात् ॐ अग्नये सुश्रवः सुश्रवसं माकुरु ॐ यथा त्वमग्ने

उप. सुश्रवः सुश्रवा असि ओं यथा त्वं मा सुश्रवः सौश्रवं संकुरु ओं यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि ओं
१६ एवमहं मनुष्याणां वेदस्य निधिपो भूयासं ततः प्रदक्षिणमग्निं वारिणा पर्युक्ष्य उत्थाय हृष्टांजलिः प्रादेशमि
तपलाशसमिधमादाय जुहुयात् तत्र मंत्रः अग्नये समिधमाहार्षं बृहते जातवेदसे यथा त्वमग्ने समि
धा समिध्यस एवमहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन समिंधे जीवपुत्रो मम
13 आचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासं स्वाहा ततः स
मिधं त्रयमनेनैव क्रमेण प्रत्येकं हुत्वा उपयमनेनैव क्रमेण पंचाहुतीर्हुत्वा सुक्तिनिधिं हुत
शेषेनेन जुहुयात् अग्ने सुश्रवः सुश्रवसं मा कुरु ओं यथा त्वमग्ने सुश्रवः सुश्रवा असि ओं एवं
मां सुश्रवः सौश्रवसं कुरु यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि ओं एवमहं मनुष्याणां वेद
स्य निधिपो भूयासं ततः प्रदक्षिणमग्निं पर्युक्ष्य तूष्णीं पाणी प्रतप्य मुखं प्रतिमंत्रेणैव शातितनू १
पा अग्नेऽस्यायुर्मे देहि ओं वर्चोदा अग्नेऽसि वर्चो मे देहि ओं अग्ने यन्मे तन्वा ऊनं तन्म आपृण ओं मेधां
मे देवः सविता आदधातु ओं मेधां मे देवी सरस्वती आदधातु ओं मेधां मे अश्विनौ देवा वाधत्तां पु
ष्करस्रजौ तत्र सर्वगात्रादिषु दक्षिणपाणिना स्पर्शः तत्र प्रत्येकं मंत्रः ओं अंगानि च म आप्या
यंतां इति सर्वस्पर्शः ओं प्राणश्च म आप्यायतां इति नासिकयोः चक्षुश्च म आप्यायतां इति
चक्षुषोः ओं श्रोत्रं च म आप्यायतां इति श्रोत्रयोः ओं यशोबलं च म आप्यायतां इति मंत्रपाठमा
त्रे ततो दक्षिणानामिकाग्रगृहीतभस्मना ललाटे ग्रीवायां दक्षिणबाहुमूले हृदि च त्र्या
युषं कुर्यात् यथासंख्येन मंत्रवचनं यथा ओं त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं यद्देवेषु

आयुषं ॐ तन्नो अग्नेस्त्वायुषं ततो यस्य पाणिभ्यां पृथिवीं स्पृशन् प्रथमं वैश्वानरो संवोध्याभिवादयेत्
तत्र ॐ अमुकगोत्रोहममुकशर्माहं अमुकप्रवरोहं भो वैश्वानर त्वामभिवादये इति प्रकारः ततस्तथै
व वरुणं संवोध्याभिवाद्य तथैवाचार्यमभिवादयेत् तत्र ॐ आयुष्मान्भव सोम्येत्याचार्यो ब्रूयात् ततो गुरु
त्तरतः प्रागग्रान्कुशानास्तीर्य तदुपरि दक्षिणोत्तरक्रमेण साधितवारिपूर्णकलशाष्टकं तेषु कलशानां पुर
तः प्रागग्रेषु स्थितात्प्रथमकलशादाम्रपल्लवेनोदकं गृहीत्वा ॐ ये अप्स्वन्तरग्नयः प्रविष्टा गोह्य उपगोह्यो मयूषो
मनोहास्खलो विरुजस्तनूदूषुरिन्द्रियहातान्विजहामि यो रोचनस्तमिह गृह्णामीति मन्त्रेण ततस्तेनमा
त्माभिषिंचामि श्रियै यशसे ब्रह्मणे ब्रह्मवर्चसाय इत्यात्मानमभिषिंचति ततो द्वितीयकलशस्थमुदकं पू
र्ववद्गृहीत्वा आम्रपल्लवेनाभिषिंचति ॐ येन श्रियमकृणुतां येनावमृशतां सुरां येनाक्ष्यावभ्यषिंचतां
यद्वां तदश्विना यशः इति मन्त्रेण ततस्तेनैव क्रमेण तृतीयकलशस्य जलमादाय ॐ आपोहिष्ठामयो
भुवस्तान ऊर्जे दधातन महेरणाय चक्षसे इति मन्त्रेणाभिषिंचति तेनैव मन्त्रेण चतुर्थकलशस्य जलमा
दाय ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः उशतीरिव मातरः इति मन्त्रेणाभिषिंच्य पंचमकल
शस्य जलं तथैवादाय ॐ तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ आपो जनयथा च नः इति मन्त्रेणाभि
षिंच्य ततो वशिष्टकलशत्रितयजलं तथैव प्रत्येकं गृहीत्वा तूष्णीं प्रत्येकमभिषिंचति ततो मेख
लां मौञ्जीं शिरोभागेन ॐ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमं श्रथाय अथा वयमादित्य व्रते
तवानागसो अदितये स्याम इति मन्त्रेण दण्डं ह्सनं तरीयं च हत्वा आचम्य बद्धाञ्जलिरादित्यमुपतिष्ठे
त् ब्रह्मचारी ॐ उद्यन् भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्प्रातर्या·· भिदशशानिरसि दशशानिं मा कुर्वी

३५. विदन्मागमय उद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थाद्दिवायावभिरस्थात् शतसनिरसि शतसनिं माकुर्वा
१५ विदन्मागमय उद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थाद्दिवायावभिरस्थात् शतसनिरसि शतसनिं माकुर्वावि
दन्मागमय उद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्सायंयावभिरस्थात्सहस्रसनिरसि सहस्रसनिं माकुर्वा
विदन्मागमय इति मन्त्रेण ततो दधितिलान्प्राश्याचम्य नखलोमादीन् छेदयित्वा स्नात्वाचम्य
प्रादेशमितोदुम्बरकाष्ठेन दन्तधावनं ॐ अन्नाद्याय व्यूहध्वं सोमो राजायमागमत् स मे मुखं प्रमार्क्ष्यते य
शसा च भगेन चेति मन्त्रेण ततो दन्तकाष्ठं परित्यज्याचम्य सुगन्धद्रव्येनोद्वर्तनानन्तरं स्नात्वा बहिराच
म्य चन्दने ॐ ॐ मेदिनानामिकया मुखस्यालेपने ॐ प्राणापानौ मे तर्पय ॐ चक्षुर्मे तर्पय ॐ श्रो
त्रं मे तर्पय इति मन्त्रेण ततो दक्षिणाभिमुखः पातितवामजानुः कृतापसव्यो दक्षिणाग्रकुशत्रय
जलान्यादाय स्वस्य तत्र शत्रयोपरि पितॄन् तर्पयेत् ॐ पितरः शुन्धध्वं इति मन्त्रेण ततश्चाचम्या नु ५
लिप्य जपेत् ॐ रुचद्दाग्रहमस्तिभ्यां भूयासं सुवर्चा मुखेन सुश्रुत् कर्णाभ्यां भूयासमिति ततोऽ
हतवस्त्रपरिधाने ॐ परिधास्ये यशोधास्ये दीर्घायुत्वाय जरदष्टिरस्मि शतं च जीवामि शरदः पुरूची
रायस्पोषमभिसंव्ययिष्ये इति मन्त्रेण ततो यज्ञोपवीतपरिधाने यज्ञोपवीतं परमं पवित्रं प्रजापते
र्यत्सहजं पुरस्तात् आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः इति मन्त्रेण ततश्चाचमनं
उत्तरीयं ॐ यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती यशो भगश्च मा विदद्यशो मा प्रतिपद्यतां
इति मन्त्रेण ततः पुष्पग्रहणे ॐ या आहरज्जमदग्निः श्रद्धायै मेधायै कामायेन्द्रियाय ता अहं प्रतिगृह्णा
मि यशसा च भगेन चेति मन्त्रेण ततः पुष्पमालापरिधाने ॐ यद्यशोऽप्सरसामिन्द्रश्चकार विपु

लंकृतः पुत्रेव संप्रेषिताः समनसम्राव भ्रामि सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः
तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः इति मन्त्रेण ततः कुण्डले परिदधाति ओं अलंकर
णमसि भूयोऽलंकरणं भूयात् इति मन्त्रेण ततोऽञ्जनं ओं वृत्रस्यासि कनीनकश्चक्षुर्दा असि चक्षुर्मे
देहि इति मन्त्रेण ततः आदर्शे आत्मदर्शनं ओं रोचिष्णुरसि इति मन्त्रेण ततः छत्रग्रहणं ओं बृहस्प
तेश्छदिरसि पाप्मनो मामन्तर्धेहि तेजसो यशसो मा अन्तर्धेहि इति मन्त्रेण ततः पद्भ्यामुपानहौ
प्रतिगृह्णाति ओं प्रतिष्ठे स्थो विश्वतो मा पातं इति मन्त्रेण ततो वैणवदण्डधारणं ओं विश्वाभ्यो मा
नाष्ट्राभ्यः परिपाहि सर्वतः इति मन्त्रेण ततः आचार्याय वरं दक्षिणां दद्यात् ततः पूर्णाहुतिः आयु
र्दा अग्ने जुह्वाणो घृतयावं दद्यात् इति मन्त्रेण पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्म
णो वसुनीथ यज्ञैः घृतेन त्वं तन्वो वर्धयस्व सत्याः सन्तु यजमानस्य कामाः । सप्त ते अग्ने समि
धः सप्त जिह्वाः सप्त ऋषयः सप्त धाम प्रियाणि सप्त होत्रा रत ॐ ओं मूर्धानं दिवो अरतिं पृथिव्या
वैश्वानरमृत आ जातमग्निं कविं सम्राजमतिथिं जनानाम् आसन्नः पात्रं जनयन्त देवाः स्वाहा इ
ति मन्त्रेण फलपुष्पसमन्वितं घृतपूर्णं स्रुवेण माणवकदक्षिणकरस्पृष्टेनाग्नये पूर्णाहुतिमाचा
र्यः कुर्यादिति ततः उपयमस्रुवे भस्मानीय दक्षिणानामिकाग्रगृहीतभस्मना ओं त्र्यायुषं जम
दग्नेः इति ललाटे कश्यपस्य त्र्यायुषमिति ग्रीवायां ओं यद्देवेषु त्र्यायुषमिति दक्षिणबाहुमूले
ततो अस्तु त्र्यायुषमिति हृदि इति त्र्यायुषं कुर्यात् अनेनैव क्रमेण कुमारललाटादावपि तत्र
ततो इत्यस्य स्थाने तन्नि इति विशेषः ततो हवींषि तनादि घृतदर्शनेन च इति मस्तामस्तन समाप्ता

३५ मंत्राधिपति श्रीरामदत्तविरचितायां वाजसनेयानां उपनयनकर्मपद्धतिस्समाप्ता समाप्तम् शुभम् ॥
१५ ओं मेखलीरसनाब्राह्मणस्य ब्रह्मचारिणो भवति धनुर्ज्याचापस्य गुणः रसना राजन्यस्य ब्रह्मचारिणो भ
वति मौर्वी मूर्वितन्तुणाविशेषः तन्मयी मेखला वैश्यस्य भवति पैणोयमन्तरीयं ब्राह्मणस्य रौ
रवो राजन्यस्य रुरुश्चित्रको मृगः अजिनेहृतं वैश्यस्यान्तरीयं यज्ञोपवीतमिति हृदयस्तनिना
मह पकसमयेजातेदक्षिणबाहुमुद्धृत्य वामस्कन्धे यज्ञोपवीतं निवेशयेदिति ब्राह्मणस्य पाला
15 शोदंडः वैल्वो राजन्यस्य औदुंबरो वैश्यस्य अश्वत्थो लाभे यथालाभमुपादेयाः ब्राह्मणस्य केशसम्मि
तः यदादि केशमूलावधि प्रमाणकः क्षत्रियस्य ललाटसम्मितः ललाटावधि प्रमाणः अ
स्यावधिरित्यर्थः वैश्यस्य घ्राणसम्मितः ओष्ठपुटावधि दंडः सामिधलक्षणं तोष्ठादापिकायो
सामितमूलनया कश्चित् नविप्रकाशाधिकान्तानजत्या स्वच्छिशाखकानसपरणानविंवी ५
मीहोमेषु च विज्ञानता भवति भिक्षां येहि इतिब्राह्मणः भिक्षां भवतिदेहि इतिराजन्यः
भिक्षां देहि भवति इतिवैश्यः अभिवादनेन पादसंग्रहणं अन्नभिक्षायाचनवाक्यं भवति
इति संबोधयनयदान् स्त्रियोभिक्षेतेति या मेकीदृशीयाः प्रत्याख्यानेन कुर्वतीताभिक्षेतेत्य
न्वयः उपास्ति इत्यस्यार्थः अयम्य उपनु दयकुर्वन् स्थितो भवति आजन्मस्य आजनः रसमा
विभर्तीति आजन्मस्य प्राजः प्रमूषमहन्निर्दिवे सहमस्यात् अर्कि मत्रे यावाभिः या
वद्भिः यावन्तो देवास्ते सर्वैः सहास्थितो बभूवेत्यर्थः ततो हेविदन् सर्वजानन् आदित्यं
दशमतिरसिवद्रु यत्नाभि अग्नः मामादप्रासर्ति ऊरुवद्रूयते ऊरुकिमाब्रह्मचर्याद्गो

णीप्रागमयजानाहीद्विनीस्तनीयपाठयोस्त्व दिवायावभिः सायंयावभिः शतशानिरसि: सहस्रशानि
उप॰ रसि इत्येतावन्मात्रेषुविशेषः तत्रदिवासायमिति प्रसिद्धार्थंशतसहस्रपादो बहुत्ववचनमे
१६ वमग्रपंरसर्वसमाने आदित्याप्रातर्दिवसायंकालेषुरश्मीन्ध्यारयन् सर्वैर्देवैः सहस्थितोवभ्र
वेत्यादित्यमत्वकीर्तिहसर्वैरत्राआदित्यत्वे बहुधनोसिमा बहुधनेऊरु उनीणा ब्रह्मचर्यमाजानी
हि वेतिवाक्यार्थः अत्रयावभिरिति यावद्भिरित्यत्रचवर्णागमोवर्णा गमोवर्णविपर्ययश्चेतिद
कारेलोपः द्वादशांगुलेनब्राह्मणःदशांगुलेन राजन्यः अष्टांगुलेन वैश्योदनयावनेऊर्यादि
16 तिहिपितरः कुंपखंपोयनमसिपत्रकर्मपदमप्यहनेवोपवेमोशोयपधामितियावावा
क्यार्थः सुगंधद्रव्येण गात्राण्यनुलिप्यजेयत् अथसामग्रीअग्नीनापात्र ३ प्रोक्षणीपात्र २
आज्यस्थाली ३ पूर्णपात्र ३ नारियेल २ ऊपीना ५ पोतीया ५ कलश ८ शेलं २ रो
लीया ० मोलीया॰ केसर॰ पुष्प चंदन ताम्बूल चाउल यज्ञोपवीत ९ चोआ गेडुव
रदीदातन पटडीयां कुटणा नूतनवस्त्र नली कुंडल अंजन सीसा कंघी चंगे
२ रेतकृतवेद चेदोआ मोटावासदा खडाउ आपनासे कांस्यपात्रअर्घ्यर्थ छाया
पात्र: स्वर्णमौंजीमेखला मृगचर्म पालाशदंड कोलो कसार भिक्षार्थं कांस्यपात्रे
ऊपाः दूर्वासरचे गोहर्लमिया पालापप मरोणा गोहे स्रुवा दधि तिल= आम्रपत्र १६
लालमटी /आटा रंग ५ सालू भू दी ने ब्राह्मणभोजन दक्षिणा ॥ राम
राम